# श्रीसोमनाथसंस्कृतयुनिवर्सिटी, वेरावलम्

# सत्रान्तपरीक्षा एप्रिल – २०१६

| | | |
|---|---|---|
| कक्षा – आचार्यः-१ (SEM-2) | **प्रश्नपत्रम् – ३** | गुणाः - ७० |
| विषयः – साहित्यशास्त्रम् | **CC-4.2.5** | समयः - ११ तः २ |
| दिनाङ्कः – १९/४/२०१६ | सन्दर्भग्रन्थः – ध्वन्यालोकः (लोचनटीकासहितः) चतुर्थोद्योतः | |

| | | |
|---|---|---|
| | **प्रथमान्वितिः -१** | |
| **प्रश्नः -१** | **लोचनटीकापुरस्सरं व्याख्या विधेया ।** | ०४ |
| | (१) ध्वनेर्यः स गुणीभूतव्यङ्ग्यस्याध्वा प्रदर्शितः । <br> अनेनानन्त्यमायाति कवीनां प्रतिभागुणः ॥ <br> (२) दृष्टपूर्वा अपि ह्यर्थाः काव्ये रसपरिग्रहात् । <br> सर्वे नवा इवाभान्ति मधुमास इव द्रुमाः ॥ | |
| **प्रश्नः -२** | अविवक्षितवाच्यस्य ध्वनेः पूर्वार्थानुगमेऽपि कथं नवत्वमिति सोदाहरणं ग्रन्थोक्तदिशा व्युत्पादनीयः । <br> अथवा <br> रसभावाद्याश्रयेण काव्यार्थानामानन्त्यं व्युत्पाद्य विवक्षितान्यपरवाच्यध्वनेः कथं नवत्वमिति ध्वनिकारदिशा लोचनकारदिशा च प्रतिपादयत । | १२ |
| **प्रश्नः -३** | **द्वौ प्रश्नौ द्वित्रैर्वाक्यैः समाधेयौ ।** | ०४ |
| | (१) ध्वनिप्रपञ्चस्य फलान्तरं किम् ? कथम् ? <br> (२) "यः प्रथमः प्रथमः---------" इत्यत्र को ध्वनिः ? <br> (३) "अर्थविशेषान् सा जयति विकटकविगोचरा वाणी" इत्यस्य भावर्थः लेख्यः । | |
| | **द्वितीयान्वितिः - २** | |
| **प्रश्नः - ४** | **कस्यचिदेकस्य लोचनटीकानुगुणं विवेचनं करणीयम् ।** | ०४ |
| | (१) व्यङ्ग्यव्यङ्जकभावेऽस्मिन्विविधे सम्भवत्यपि । <br> रसादिमय एकस्मिन्कविः स्यादवधानवान् ॥ <br> (२) ध्वनेरित्थं गुणीभूतव्यङ्ग्यस्य च समाश्रयात् । <br> न काव्यार्थविरामोऽस्ति यदि स्यात्प्रतिभागुणः ॥ | |
| **प्रश्नः -५** | 'शान्तस्यैव रसस्याङ्गित्वं महाभारते'इत्यस्य सार्थकत्वम् ग्रन्थोक्तदिशा प्रतिपादयत । <br> अथवा <br> शुद्धस्यापि वाच्यस्यावस्थादिविशेषैः कथमानन्त्यं जायते इति सोदाहरणं विवेचयत । | १२ |
| **प्रश्नः -६** | **द्वौ प्रश्नौ द्वित्रैर्वाक्यैः समाधेयौ ।** | ०४ |
| | (१) रामायणस्याङ्गीरसः कः ? कस्मात् ? <br> (२) किमुक्तिवैचित्र्यम् ? | |

| | | |
|---|---|---|
| | (३) “सामान्यात्मना वस्तूनि वाच्यतां प्रति पद्यन्ते, न विशेषात्मना” इत्यस्य भावार्थः लेख्यः । | |
| | **तृतीयान्वितिः - ३** | |
| **प्रश्नः -७** | **कस्यचिदेकस्य श्लोकस्य लोचनदिशा व्याख्या करणीया ।** | ०४ |
| | (१) वाचस्पतिसहस्राणां सहस्रैरपि यत्नतः ।<br>निबद्धापि क्षयं नैति प्रकृतिर्जगतामिव ॥<br>(२) नहि शरीरी शरीरिणान्येन सदृशोऽप्येक एवेति शक्यते वक्तुम् । | |
| **प्रश्नः -८** | कः संवादः? तत्पुनः कतिविधा ? इति विलिख्य ग्रन्थोक्तदिशा विस्तरेण तेषां वर्णनं कुर्वन्तु।<br>अथवा<br>“मेधाविनां सादृश्यं (संवादाः) न दोषत्वम् धत्ते” इत्यस्य सार्थकत्वं प्रतिपादनीयम् । | ०८ |
| **प्रश्नः -९** | **त्रयः प्रश्नाः एकवाक्येन समाधेयाः ।** | ०३ |
| | (१) “देशकालादिमेदिनी” इत्यत्र आदिपदेन कस्य कस्य ग्रहणम् ?<br>(२) “विपश्चिता” अर्थात् किम् ?<br>(३) कीदृशं काव्यवस्तु कविना न त्यक्तव्यम् ?<br>(४) “प्रकृतिर्जगताम् इव” इत्यत्र “प्रकृतिः” इति शब्दः केनदर्शनेन शास्त्रेण् वा सम्बधितः ।<br>(५) “रसभावादिसम्बद्धा ---------- ” इत्यत्र कारिका केषामुपदेशाय ? | |
| | **चतुर्थान्वितिः - ४** | |
| **प्रश्नः -१०** | **कस्यचिदेकस्य श्लोकस्य लोचनटीकोपेता व्याख्या विधेया ।** | ०४ |
| | (१) आत्मनोऽन्यस्य सद्भावे पूर्वस्थित्यनुयाय्यपि ।<br>वस्तु भातितरां तन्व्याः शशिच्छायामिवाननम् ॥<br>(२) पुरस्वादानेच्छाविरतमनसो वस्तु सुकवेः ।<br>सरस्वत्येवैषा घटयति यथेष्टं भगवती ॥ | |
| **प्रश्नः -११** | “पुरातनी वस्तुरचना नूतने स्फुरति काव्यवस्तूनि न दुष्यति-------------” इत्यस्य सार्थकत्वं प्रतिपादयत ।<br>अथवा<br>चतुर्थस्य उद्योतस्य विषयाः संक्षेपेण प्रतिपादनीयाः । | ०८ |
| **प्रश्नः -१२** | **त्रयः प्रश्नाः एकवाक्येन समाधेयाः ।** | ०३ |
| | (१) चतुर्थे उद्योते कति कारिकाः ?<br>(२) आनन्दवर्धनः केनोपाधिना विभूषितोऽसीत् ?<br>(३) कविभिः कुत्र सादः न कर्त्तव्यः ?<br>(४) कस्य कृते भगवती सरस्वती वस्तु घटयति ?<br>(५) कीदृशः कविः निन्द्यतां नोपयाति ? | |

***